# Shri Yoganandadashakam

# श्रीयोगानन्ददशकम्

## Document Information

Text title : Shri Yoganandadashakam

File name : yogAnandadashakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, dashaka

Location : doc_deities_misc

Author : Brahmachari Medhachaitanya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीयोगानन्ददशकम्

सावर्णवंशे जननं प्रसिद्धे ब्राह्मेऽन्वये शुद्धपवित्रगोत्रे ।
तवेश्वरे कोटिगतस्य देव श्रीरामकृष्णप्रिय पार्षदस्य ॥ १॥

लीलास्थली सा भगवत्प्रिया या नाम्ना स दक्षेश्वर एव धाम ।
तत्रावसस्त्वं सुकृतस्य भक्त्या किं नाम भाग्यं वचनैरवाच्यम् ॥ २॥

यदा कथञ्चिद्विषयस्तवासीच्छ्रीरामकृष्णविषये जनन्याः ।
श्रीशारदायाः किमितो गृहं सोऽगमच्च रात्रौ व्यभनक् तवासौ ॥ ३॥

दिनेऽपि पश्येरपि रात्रिकाले साधुं तदन्ते सुविनिश्चिनुष्व ।
परीक्षया वै ग्रहणार्थमुक्तस्त्वं रामकृष्णेन पुरो जगत्याः ॥ ४॥

अथैकदा भक्तगणेभ्य आत्तः श्यामा प्रसादो न च काल एतः ।
अन्वेषणार्थं प्रतिलोकप्रश्नैर्दृष्ट्वा प्रभूस्तद्गतवान् बहिश्च ॥ ५॥

शङ्का तवासीद् बत चित्त एषा यावान् भवेद् याजनिको द्विजातिः ।
प्रभूर्हितार्थीकिल रासमण्या आह प्रदिष्टो महते न चौरे ॥ ६॥

इत्थं परीक्ष्य ग्रहणं करोषि श्रीरामकृष्णं बहुधा स्म देवम् ।
न भावविभ्रान्तनृवत् कदाप्यग्रहीरतस्त्वं प्रभुपार्षदोऽसौ ॥ ७॥

लोकातिगस्त्वं जित काम इष्टः श्रीरामकृष्णेन सदा गृहीतः ।
त्वमीशकोटिस्थित एव तेन प्रोक्तः स्वभक्तेभ्य इतो न वार्ता ॥ ८॥

त्वं कामजिदेव पुमान् वरेण्यो नास्त्यत्र सन्देह इति स्म देवैः ।
उक्तं युगाचार्य वरैर्विवेकानन्दैर्महात्मप्रवृतैर्जगत्याम् ॥ ९॥

गृहाण पुष्पाञ्जलिरेष नस्त्वं प्रत्तः पदाब्जे तव भक्तिहेतोः ।
याचामहे त्वां वरमेतमेकं भक्तिं प्रयच्छ प्रभुपादयुग्मे ॥ १०॥

इति ब्रह्मचारिमेधाचैतन्यविरचितं
"श्रीमत्स्वामियोगानन्ददशकम्" सम्पूर्णम् ।

प्रणाममन्त्रः-
मुक्तात्मानमतिस्थिरं धननिष्ठमहर्निशम् ।
नमामि श्रीयोगानन्दमानन्दकन्दमन्दरम् ॥

Proofread by Aruna Narayanan

*Shri Yoganandadashakam*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*